**पयःफेनी** स्त्री पयः दुग्धमिव फेनमस्याः गौरा० ङीष्। दुग्धफेन्यां राजनि०।

**पयश्चय** पु० ६त० जलपूरे जटा०।

**पयस्** न० पा—पाने कर्मणि असुन् इकारस्यान्तादेशः। १दुग्धे २जले च मेदि० ३अन्ने ४रात्रौ च निघण्टुः।

**पयस्य** प्रसृतौ (परिमाणविशेषे) कण्ड्वा०अक०सेट्। पयस्यति अपयस्यीत्।

**पयस्य** त्रि० पयसो दुग्धस्य विकारः तत्र हितं वा यत्। १दुग्धविकारे दध्यादौ अमरः। २दुग्धहिते त्रि०३विड़ाले पु० शब्दच०। ४दुग्धिकायां ५क्षीरकाकोल्यां ६स्वर्णक्षीरिकायां च स्त्री मेदि०। ७अर्कपुष्पिकायां रत्नमाला ८कुटुम्बिनीक्षुपे राजनि०। ९आमिक्षायाम् हेमच०।

**पयस्वत्** त्रि० पयस्+अस्त्यर्थे मतुप् मस्य वः सान्तत्वान् न पदकार्य्यम्। १जलविशिष्टे स्त्रियां ङीप्। २नद्यां स्त्री ब०व० निघण्टुः।

**पयस्वल** त्रि० पयोऽस्त्यस्य वलच् सान्तत्वात् न पदकार्य्यम्। १जलयुक्ते। २छागे पुंस्त्री राजनि० स्त्रियां जातित्वात् ङीष्।

**पयस्विन्** त्रि० पयोऽस्त्यस्य विनि न पदकार्य्यम्। १पयोविशिष्टे स्त्रियां ङीप्। २नद्यां ३धेन्वां ४रात्रौ च मेदि०। ५काकोल्यां ६क्षीरकाकोल्यां ७दुग्धफेन्यां ८क्षीरविदार्य्यां ९छाग्यां राजनि०। १०जीवन्त्यां भावप्र०।

**पयाय** आत्मनः पय इच्छति क्यङ् नामधातुः आ०अक०सेट् वा सलोपः। पयायते पयस्यते।

**पयोगल** पु० पयो गलति यस्मात् गल—अपादाने क। १घनोपले (करका) २द्वीपे च शब्दमा०।

**पयोग्रह** पु० पयसो दुग्धस्य ग्रहः ग्रह आधारे अच्। यज्ञिये पात्रभेदे। कात्या० श्रौ०१०।२।१२।

**पयोघन** पु० पयसा घनो निविड़ः। वर्षोपले हारा०।

**पयोजन्मन्** पु० पयसो जन्म यस्मात्। १मेघे शब्दमा०। २मुस्तके च।

**पयोद** पु० पयो ददाति दा—क। १जलदे मेघे २मुस्तके च ३यदुवंशपपुत्रभेदे हरिवं० ३०अ० ४कुमारानुचरमातृभेदे स्त्री भा०श०४७अ०।

**पयोधर** पु० पयो दुग्धं जलं वा धरति धृ—अच् ६त०। १मेघे २स्तने अमरः ३मुस्तके च ४कोषकारे ५नारिकेले ६कशेरुके च मेदि०। [त्रि० उणा०।

**पयोधस्** पु० पयो दधाति धा—असुन्। १समुद्रे २जलाधारे

**पयोधारा** स्त्री ६त०। १जलानां धारायाम्। पयसां धारा यत्र। २नदीभेदे हरिवं० २२२ अ०।

**पयोधि** पु० पयो धीयतेऽस्मिन् धा—आधारे कि उप०स०। समुद्रे राजनि०। [राजनि०।

**पयोधिक** न० पयधौ तदुपरि कायति कै—क। समुद्रफेने

**पयोनिधि** पु०पयांसि निधीयन्ते यत्र नि+धा—आधारे कि उप०स०। समुद्रे। [२मुस्तके च।

**पयोमुच्** पु० पयोमुञ्चति मुच—क्विप्। १जलमुचि मेघे

**पयोर** पु० पयोजलं सेवने मुखनिस्रवजलं राति रा—क। १खदिरे शब्दार्थ०। २जलदायिनि त्रि०।

**पयोलता** स्त्री पयःप्रधाना लता। क्षीरविदार्य्यां राजनि०

**पयोवाह** पु० पयो जलं वहति वह—अण् उप०स०। १मेघे २मुस्तके च।

**पयोव्रत** न० पयः तत्पानमात्रं व्रतम्। १दुग्धपानमात्रे व्रतभेदे तच्च त्रिरात्रादिसाध्यं मत्स्यपु० उक्तं यथा "पुण्यां तिथिं समासाद्य युगमन्वन्तरादिकम्। पयोव्रतस्त्रिरात्रं स्यादेकरात्रमथापि वा" ५२अ० तद्द्विविधं प्रायश्चित्तात्मकं काम्यञ्च मनुः११।१४४। द्वादशाहसाध्यं तु विष्णुव्रतभेदः भाग०८।१६। पयस्तत्पानं व्रतमस्य। २यज्ञदीक्षितव्रतभेदे शत०ब्रा० ९।५।१।१

**पयोष्णिजाता** स्त्री। पयोष्णी जाता यस्याः ५ब०। सरस्वत्यां नद्यां राजनि०।

**पयोष्णी** स्त्री विन्ध्याचलदक्षिणस्थे नदीभेदे "पयोष्णी सलिलं रुच्यं पवित्रं पापनाशनम्। सर्वामयहरं सौख्यबलकान्तिप्रदं लघु" राजनि०। "एष विन्ध्यो महाशैलः पयोष्णीयं समुद्रगा। आश्रमाश्च महर्षीणां बहुमूलफलान्विताः। एष पन्था विदर्भाणामसौ गच्छति कोसलाम्। अतः परञ्च देशोऽयं दक्षिणे दक्षिणापथः" भा० व० ६१अ०।

**पर** त्रि० पृ—भावे अप्, कर्त्तरि अच् वा। १अन्यस्मिन् भिन्ने २उत्तरे ३दूरे ४सीमापरिच्छिन्ने ५श्रेष्ठे च ६मोक्षे ७केवले ब्रह्मणि च न० "द्वे ब्रह्मणी वेदितव्ये परञ्चापरमिति" श्रुतिः। ८शत्रौ पु०। अस्य व्यवस्थायां सर्वनामता ङिङस्योर्जसि च वा परस्मात् परात्। परे पराः वा। शत्रुपरत्वेऽपि व्यवस्थाबोधनात् सर्वनामता। ९ब्रह्मण आयुःकाले च पु० "कालसंख्यां समासेन पूर्वार्द्धं दयकल्पिताम्। स एव स्यात् परः कालस्तदन्ते परिपूर्य्यते। निजेन तस्य मानेन चायुर्वर्षशतं स्मृतम्।